# ।। श्रीविष्णुपुराणम् ।।

विद्वान्. बिदरहल्लीत्युपाह्वः कृष्णाचार्यः

## प्रथमांशः

प्रथमाध्यायः

पुराणमिदं षडंशर्युतम् । प्रथमांशे द्वाविंशत्यध्यायाः, द्वितीयांशे षोडषाध्यायाः, तृतीयांशे अष्टादाशाध्यायाः, चतुर्थांशे चतुर्विंशत्यध्यायाः पञ्चमांशे अष्टत्रिंशाध्यायाः, अन्तिमे षष्टांशे अष्टौ  अध्यायाः सन्ति । आहत्य एकोनत्रिंशाधिकशताध्यायैर्निबद्धमिदं पुराणम् ।

पुराणपीठिका - सूताचार्यः विष्णुंपुराणस्य प्रवर्तकं पराशरमपृच्छत् । अस्य जगत उत्पत्ति- र्लयः, समुद्रपर्वतादीनां संस्थानं, सूर्याद्याकाशकायानां संस्थानं, मनोस्तस्य पुत्राणां चरितं, युगधर्माश्चेति नानाविषयक सप्तदशप्रश्नानि । अतः पराशरो विष्णुपुराणमुपदिदेश ।

द्वितीयोऽध्यायः

पराशरस्य पूर्ववृत्तान्तः — महर्षिर्विश्वामित्रो राक्षसमेकमसृजत, वशिष्ठवंशनिर्मूलनार्थम् । स्वपूर्वजहिंसकानि रक्षांसि नाशयितुं पराशरः सत्रमेकमारभत । सत्रेऽस्मिन् सः सहस्रधिकानि राक्षांसि जघान । तदा पराशरस्य पितमहो वशिष्ट आजगाम, स उपादिदेश पराशरं स्वपौत्रम् । रोषामर्शादयस्तपः क्षयकारकाः । न तान् सेवत । न रक्षांसि कारणानि त्वद्दुःखस्य । विधिना यन्निश्चितं तद्भवत्येव । क्रोधो दुष्टानां गुणः, न ज्ञानिनां शोभावहः । अतिक्लेशार्जितानि पुण्यानि क्रोधान्नाशमाप्नुवन्ति । यशश्च क्रोधान्नष्टं भवति । पितामहस्य वसिष्टस्योपदेशेन पराशरस्तु यज्ञादुपारमत । यज्ञान्निवृत्तं पराशरं राक्षसकुलपूर्वजो महर्षिः पुलस्त्योऽनुजग्राह । ‘यदुपदेशादेव दुःसहं क्रोधं जितस्त्वम् कीर्तिमान् भव । पुराणप्रवर्तको भव परमार्थाः प्रतिभास्यन्ते’ इति ।

सूतेन पृष्टः पराशरस्तु सप्तप्रश्नानामुत्तरमत्र पुराणे विष्णावस्तीति तत्पुराणमेवोपदिदेश ।

पुराणगतिक्रमः — इमं पुराणं प्रथमं दक्षादिभ्यश्चतुर्मुख उपदिदेश । दक्षात् पुरुकुत्सः, सोऽपि  सात्वताय, तेन पराशरोऽवाप ।

**।। श्रीविष्णुमहापुराणं समाप्तम् ।।**

## ।। श्रीमद्गरुडमहापुराणम् ।।

विद्वान्. बिदरहल्लीत्युपाह्वः कृष्णाचार्यः

अजमजरमनन्तं ज्ञानरूपं महान्तं शिवममलमनादिभूतदेहादिहीनम् ।
सकलकरणहीनं सर्वभूतस्थितं तं हरिमलममायं सर्वगं वन्द एकम् ।।

नारायणं नमस्कृत्य नरं चैव नरोत्तमम् । देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ।।

प्रथमाध्यायः

पुराणपीठिका — शौनकादयः सूताचार्यमपृच्छन् । देवेषु श्रेष्ठः कः ? मुख्यतो ध्येयः कः ? अस्य जगतः सृष्टिस्थितिलयानां कर्ता कः ? धर्मस्य कः प्रवर्तकः ? दुष्टानां निग्राहकः कः ? किं दैवलक्षणम् ? सृष्टेः रहस्यं कथय । हरेरनुग्रहाय कं व्रतं चरणीयम् ? को योगो विहितः ? तस्यावतारान् कथय इति ।

सूत उवाच— एतेषां सकलप्रश्नानामुत्तरो गारुडेऽस्ति । एतत्पुराणमादौ गरुडः कश्यपायोवाच । व्यासादहं लेभे । भगवतो हरेरवतारा असङ्ख्येयाः । कुमारः, कपिलः, पृथुः, मत्स्यः, कूर्मः, वराहः, इति कल्किपर्यन्तमेकविंशतिरूपाणि प्रथितानि । मन्वादिभूपालकेषु वेदद्रष्टुषु एवमादि सर्वेषु महापुरुषेषु हरेः कलाः सन्ति ।

आहत्य गरुडमहापुराणे अष्टाताधिकाष्टसहस्रश्लोकाः सन्ति । त्रिकाण्डात्मकमिदं पुराणम् । कर्म्रकाण्डं, प्रेतकाण्डं ब्रह्मकाण्डमिति । केषुचित् कोषेषु न ब्रह्मकाण्डं परिगणितम् ।

द्वितीयोऽध्यायः

पुराणगतिक्रमः - ध्यायन्तं शङ्करमपृच्छत् चतुर्मुखः । ''वयं सर्वे त्वामेव परदैवः' इति जानीमः । परं त्वं कमन्यं ध्यायसि ? तत्वेषु सारात् सारं कथय' इति । शङ्करउवाच- 'सर्वप्राण्यन्तर्यामिणं हरिं ध्यायामि । मयाचरणीया भस्मधारणादिव्रता अपि विष्णुप्रीत्यर्थम् । तत्त्वसारं विष्णौ पृच्छामः' इति । इत्युक्त्वा सर्वे ब्रह्मादय विष्णोः समीपं जग्मुः, शङ्करोऽस्तुवत् हरिं

(तस्यां स्तुतौ एकः श्लोकः -

यं वाक्येष्वनुवाक्येषु निषत्सु उपनिषत्सु च ।
गृणन्ति सत्यकर्माणं सत्यं सत्येषु सामसु ।।

श्लोकोऽयं महाभारते शान्तिपर्वण्यप्यस्ति । वाक्येषु- ऋक्शाखासु, अनुवाक्येषु- यजुःशाखासु, उपनिषत्सु च, सत्येषु- मीमांसाशास्त्रेषु, सामसु, सत्यकर्माणं, सत्यं - तन्त्रात्मकं हरिं गृह्णन्ति - स्तुवन्ति)

हरिरुवाच— 'हे देवाः पुरा विनता गरुडमाता नागमातायाः दास्यभूत् । तस्याः मोचनार्थं गरुडो मां तपः

चचार । अपरोक्षीभूते मयि नानावरान्नयाचत । तेषु वरेषु 'पुराणकर्ताऽहं स्याम्' इत्येको वरः । तद्वरेण गरुडो यतपुराणसंहितायाः प्रवर्तकस्तत्संहितायां युष्मत्सर्वजिज्ञासाया उत्तरमस्ति' इति । पुराणसंहितामिमां हरिः शकाशात् ब्रह्मशिवगरुडादयः गरुडात्काश्यपोवाप । अध्यायान्ते गरुडविद्योपदेशाऽेस्ति । तन्मन्त्रसिद्ध्या कश्यपो दग्धवृक्षमजीवयत् ।

पञ्चत्रिंशोऽध्यायः

वैतरणीसरिद्विवरणम् - यमपुरे वैतरणीति नद्यस्ति । शतयोजनविस्तीर्णेयं नदी, अत्यन्तभयावहा प्राणिनां पूयशोणिततोया सा नदी, वज्रतुण्डैः कृमिभिः सङ्कुलिता । तत्र द्वादशादित्या एकदैवोदितास्तापयन्ति पापिनः । ये मनुजा देवब्राह्मणार्थं न वतरन्ति धनादिकं, ते पतन्ति अस्यां नद्याम् । मातापितरं, गुरुन् देवान् पुराणवक्तारं, धर्मशीलां पतिव्रतां पत्नीं, अवमन्यन्ते, ते पतन्ति अस्यां नद्याम् । भिक्षुकं विप्रं यो विघ्नादिभिः हिंस्यन्ते, ये विश्वासघातिनः, ये ब्राह्मणाय प्रतिश्रुत्य न पुनः दास्यन्ति, ये यज्ञविध्वंसकाः, ये पैशुनास्ते सर्वे तत्र कृमिभिः पीड्यन्ति । वृषलीपतिः ब्राह्मणः, कन्यादूषकः, कपाली शूद्रः, ते वसन्ति चिरमस्यां नद्याम् । एवमन्यान्येन पापेन नरके तथा नद्यामस्यां विविधदुःखभागिनो भवन्ति ।

लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः ।

येषामिन्दीवरश्यामो हृदयस्थो जनार्दनः ॥

मङ्गलं भगवान् विष्णुः मङ्गलं गरुडध्वजः ।

मङ्गलं पुण्डरीकाक्षः मङ्गलायतनो हरिः ॥

श्रीगुरुडमहापुराणे प्रेतकाण्डः सम्पूर्णः

अथ ब्रह्मकाण्डः

मल्लानामशनिः नृणां नरवरः स्त्रीणां स्मरो मूर्तिमान् ।

गोपानां स्वजनोऽसतां क्षितिभुजां शास्ता स्वपित्रोः शिशुः ॥

मृत्युर्भोजपतेः विधातृविहितः तत्वं परं योगिनां ।

वृष्णिनां च पतिः स दैव शुशुभे रङ्गेच्युतः साग्रजः ॥

(मङ्गलश्लोकोऽयं श्रीमद्भागवतेऽपि दशमे एकाचत्वारिंशेऽस्ति)

हरिरेवादौ नम्यः - शौनकशिष्याः शैनकमपृच्छन्, 'हरौ भक्तिः कथं वर्धते मनुष्याणामिति । शौनक उवाच 'सिद्धाश्रमं गच्छामः, अत्रास्ति श्रीव्यसशिष्यः सूतः, स वेत्ति सकलं व्यासानुग्रहेण' इति । तत्र गत्वा सशिष्यः शौनकोऽपृच्छत् व्यासशिष्यं सूतम् । 'केनोपायेन विष्णुः प्रसन्नो भवति ? कथं वा कार्यं तस्य पूजा ? मुक्तिसाधनभूतानि तत्त्वानि ब्रूहि' इति ।

सूतस्तु मङ्गलव्याजेन विष्णवैष्णवादीन् ननाम । अतः पुनरपृच्छत् शौनकः सूतं सत्स्वन्यासु देवतासुतास्त्यक्त्वा कुतो वैतानेव नमसि' इत्यतोऽब्रवीत् । सर्ववेदैकवेद्यं, पुराणेतिहासेषु सवत्र प्रतिपाद्यं सर्वोत्तमं हरिमेवादौ नमेत् । न शङ्कराद्याः । न पार्थक्येनान्यान् देवान् भजेत् । पृथकपूजेन न ते तृप्तिमायान्ति । अतस्ते न पृथक् पूज्याः । रुद्रादिप्रतीकान्तरेण न पूज्यो हरिः, किन्तु वाय्वन्तर्यामित्वेनैवपूज्यः । हरिसमर्पितनैवेद्यशेषादीन् वयोः समर्पयेत् । नचास्ति विष्णोः सदृशोऽन्यो देवः, न गुरुश्च वायोरन्यः। पुराणेषु मध्ये श्रीमद्भागवतम्, श्रीविष्णुपुराणम् तथा गारुडं च श्रेयःकराणि । श्रीगरुडे च कर्मकाण्डं धर्मकाण्डं ब्रह्मकाण्डं चेति त्र्यंशानि सन्ति । तत्र तृतीयांशश्रवणेनाधिकं पुण्यम् । ततो मत्स्यपुराणं कूर्मपुराणं वायुपुराणं चेति, आहत्य षट्पुराणानि सात्विकानि । तत्रापि मत्स्यकूर्मे सत्वाधमे, वायुपुराणं तु सत्वमध्यमम् । अन्यानि त्रीणि सत्वोत्तमति ।

स्कन्दं, पद्मं, वामनं, वराहं, आग्नेयं भविष्यं चेति षट् राजसानि । तत्राप्यस्ति सात्विकराजसः राजसराजसः राजसतामस इति भेदः । राजसभूयिष्टत्वात् राजसानीति व्यवहारः । ब्रह्माण्डं, लिङ्गं, ब्रह्मवैवर्तकं, मार्काण्डेयं, ब्राह्मं नारदं चेति षट्तामसपुराणानि । एवं विष्णुधर्मोत्तरादीन्युपपुराणानि सन्ति । तत्रापि सात्विकादिप्रभेदोऽस्ति । वेदेभ्योऽर्थतो वैशिष्ट्यं महाभारते । तत्रापि श्रीमद्भगवद्गीतिका वरा, श्रीविष्णुसहस्रनाम च ।

क्रतुष्वश्वमेधः, नदीषु गङ्गा, आयुधेषु सुदर्शनः, छिन्नभक्तेषु रुद्रः, अच्छिन्नभक्तेषु वायुः श्रेष्ठः, तथा देवेषु प्रवरो हरिः, पुराणेषु गारुडम् ।

सर्वोत्तमत्वात् हरिर्नम्यः, भाग्यात्मिका श्रीः, जीवोत्तमत्वात् वायुः, वाक्यरूपत्वात् भारति, उपसाधकः शेषः, यद्यपि हरिरेव व्यासः, तथापि पुराणादि ग्रन्थानां वक्ता, अतो वाच्यवक्तृ स्वरूपो हरिः । तथापि क्वचित्तामसपुराणेषूक्तं 'व्यासः कश्चन ऋषिः' इति । अज्ञमोहानाय यदुक्तं तत्र दुष्टानां दाढर्यार्थं मङ्गलश्लोके व्यासनारायणौ पृथङ्नमितौ ।

चत्वारिंशोऽध्यायः

नरहरेः प्रादुर्भावः - पक्षिरूपिणा वायुनोक्तं श्रुत्वा दैत्योऽतीव चुकोप । विष्णोर्मूलं, द्विजाः, अश्वत्थवृक्षः, बृन्दावनमित्यादीनि मत्वा याच्नार्थमागतं द्विजं जघान । अश्वत्थवृक्षानग्निना ददाह । गोवो जघान, एवं निन्द्यनि कर्माणि चकार । स्वपुत्रं प्रह्लादं उवाच हे कुलाधम ! कुत्रास्ति तव हिरः, सर्वत्रव्याप्तो हरिस्तम्भे कुतो न दृश्यते ? बालक उवाच स्तम्भेऽप्यस्ति । 'एवं चेत् दृष्विषयो भवेत्, नोचेत् खड्गेन हरामि त्वच्छिरम्' इत्युक्त्वा मुष्टिना तताड स्तम्भम् । बालकस्य भक्तस्य प्रह्लादस्य वाक्यं सत्यं कर्तुं श्रीहरिः प्रादुर्बभूव स्तम्भात् । सुतीक्ष्मणदंष्ट्रं करालजिह्वं, करालदंष्ट्रं श्रीहरेः रूपम् । तादृशं रूपं दृष्ट्वा दैत्यश्चिन्तयामास । 'असौ मायावी हरिः, तं हनिष्याम्यद्यैव' इति । पतङ्गोऽग्निमिव हरेः समीपं जगाम दैत्यः । उरगं गरुड इव जग्राह, दैत्यं ततो विदादर दैत्योदरम् । सर्वे सज्जना मुदमापुः, देवाः प्रसूनवृष्ट्या स्वसन्तोषं प्रकटयामासुः । उग्रं नरहरिं ब्रह्मादयो देवास्तुष्टुवुः । सर्वैः सुरैः स्तुतोऽपि न शान्तो नृहरिः । अतः प्रह्लादं प्रेषयामासुः । स नत्वाहरिं तुष्टाव च प्रह्लादः । दानयज्ञादिद्वादशलक्षणलक्षितोऽपि द्विजः यदि न भक्तिः हरौ सो भक्तात् चण्डालादवरः । हरिभक्तरेव प्रधानं, सैव

दानादिधर्मान् सार्थकान् करोति । हे हरे ! सर्वे ब्रह्मादयास्तवाधीनाः नाहं विभेमि भयानकात् युष्मद्रूपात्, संसारेदेव विभेमि' इत्यादि ।

तुष्टः प्रसन्नो नरहरिः 'वरान् वरय' इत्युवाच बालकम् । 'हे हरे ! विषयेषु रतिर्नस्यात् । त्वय्यचला भक्तिः स्यात् इत्यप्रार्थयत् । तथापि श्रीहरिरवोचत् 'मदाज्ञया राज्यं प्रशाषय । मदर्पणबुद्ध्या संसारलेपो न भवति' इति ।

प्रह्लादादि कर्मजदेवतानन्तर कक्षायां परिगणिता गङ्गा । त्रिविक्रमपादाङ्गुष्टनखाग्रस्पर्शात् स्फुटितब्रह्माण्डकटाहात् सृतं बहिरुदकं तदेव निखिलमलापहन्त्री गङ्गा हरजटामण्डिता विष्णुपादोदकभूता । एषा वरुणभार्या यदा वरुणो महाभिषङ्गनाम्नावततार तदा सा अभिषेचनी नाम्नावततार । एवं शन्तनोभार्या सुषेणा, मण्डूकमुनिभार्या मण्डूक्तिनीति चत्वारि रूपाणि ।

अन्ततोऽस्मिन्नध्याये यद्यत्सन्दर्भे हरे यद्यत् रूपं स्मरेत् इति सूदीर्घो उपदेशोऽस्ति ।

समाप्तं गरुडमहापुराणे ब्रह्माकाण्डम्

## ।। श्रीमद् अग्निपुराणम् ।।

विद्वान्. बिदरहल्लीत्युपाह्वः कृष्णाचार्यः

**प्रथमाध्यायः**

**श्रियं सरस्वतीं गौरीं गणेशं स्कन्दमीश्वरम् । ब्रह्माणं वह्निमिन्द्रादीन् वासुद्रवं नमाम्यहम् ।**

परविद्या -

**मुनिभिः पृष्टः सूतः सर्वज्ञताप्रापकां वशिष्टेन व्यासायोपदिष्टां व्यासस्तु शुक्रादीनामुदिष्टां विद्या-मुपदिदेश । तदेव 'अग्निपुराणम्' । कालावग्निना विष्णु नादा पदिष्टमिदम् ।**

**कालाग्निरूपिणं विष्णुं ज्योतिर्ब्रह्मं परात्परम् ।**

**मुनिभिः पृष्टवान् देवं पूजितं ज्ञानकर्मभिः ।।**

**विष्णुः कालाग्निरुद्रोऽहं विद्यासारं वादामि ते इति ।**

**सर्गप्रतिसर्गादिपञ्चविषयान्यान्यपुराणवदत्रापि प्रतिपदितानि । उपनिषदि प्रसिद्धो विषय 'द्वेविद्येवेदितव्ये पराचापरा च' इति । स विषयोऽत्र प्रस्तापितोऽस्ति । ऋगादि वेदाः शिक्षाव्याकरणादयो वेदाङ्गाः, धनुर्वेदार्थशास्त्राण्यपरविद्या । अपरेयं परा विद्या यया ब्रह्माभिगम्यते इति । इयं च विद्या पुरा वशिष्टायोक्ताग्निना । देवेभ्यो ब्रह्मणोक्ता च ।**

द्व्यशीत्यधिकत्रिशततमोऽध्यायः

यमगीता- सतां भक्तिमुक्तिप्रदां नाचिकेतस उपदिष्टां यमगीतामग्निरुपदिदेश।

यम उवाच- अस्थिरं शयनमासनं यानं धनं वाञ्छन्ति जनाः, परन्तु मनुष्याणां परं श्रेयः कपिलब्रह्मजैगीषव्यपञ्चशिखमुखैर्मुनिभिश्चोक्तं तमुपदेक्षामि।

'प्रवृत्तश्च निवृत्तं च कार्यं कर्मपरोऽब्रवीत् । श्रेयसां श्रेय एतद्धि नैष्कर्म्यं ब्रह्म तद्धरिः ।।

नास्ति विष्णुसमं ध्येयं तपो नानशनात् परम् । नास्त्यारोग्यसमं धन्यं नास्ति गङ्गासमा सरित् । न सोऽस्ति बान्धवः कश्चिद् विष्णुमुक्त्वा जगद्गुरुम् । अधश्चोद्र्ध्वं हरिश्चाग्रे देहेन्द्रियमनोमुखे । इत्येवं संस्मरन् प्राणान् यस्त्यजेत् स हरिर्भवेत् । स विष्णुः परमं ब्रह्म यतो नावर्तते पुनः । तत्पदं नाप्नुयात् सुवर्णादिदानेन, न ध्यानेन, न व्रतैः, नापि घर्मादिसुक्तपठनेन च। हरिप्रसादार्थं एतद्विजानीयात्

'आत्मानं रथिनं विद्धि शरीरं रथमेव च । बुद्धिन्तु सारथिं विद्धि मनः प्रग्रहमेव च ।

इन्द्रियाणि हयानाहुः विषयांस्तेषु गोचरान् । आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः ।।

यस्त्वविज्ञानवान् भवत्युक्तेन मनसा सदा । सोऽध्वनं परमाप्नोति तद्विष्णोः परमं पदम् ।।

इत्याद्युपनिषन्मन्त्राक्षराण्येव संगृहीताः सन्ति ।

अन्ततोऽग्नेर्वचनम्-

वशिष्ठयमगीतोक्ता पठतां भुक्तिमुक्तिदा । आत्यन्तिको लयः प्रोक्तो वेदान्तब्रह्मधीमयः ।।

त्र्यशीत्यधिकत्रिशततमोऽध्यायः

अग्निपुराणमाहत्यमम्- सूत उवाच-

''नास्मात् परतरं ज्ञानं नास्मात् परतरा स्मतिः ।

नास्मात् परो ह्यागमोऽस्ति नास्माद् विद्या पाराऽस्ति हि ।।

नास्मात् परतरं भमौ विद्यते वस्तु दुर्लभम् ।'' इति । पुराणेऽस्मिन् हरिवंशः, भारतः, रामचरितश्चोक्तः । देवप्रतिष्टाविधिः, प्रतिमालक्षणं, नानाविधमण्डलानि, नानामन्त्राणि, नानादेवपूजाविधयः, शैवशाक्ताद्यगमाः, गयादिक्षेत्राणां, गङ्गादितीर्थाणां च महिमा, मन्वनवतरकथा, आशौचं, द्रव्यशुद्धिः, शशिसुर्यवंशः, राजधर्मः, दानधर्मः, धनुर्वेदः, नानाशान्तयः इत्यनेका विषया उपदिष्टाः। इदं पञ्चदशसाहस्रं शतकोटिप्रविस्तारमासीत्, लोकानां हितकाम्यया सङ्गृह्योपदिदेशाग्निः ।

वशिष्टो श्रीव्यासं-

''व्यासाग्नेयपुराणं ते रूपं विद्याद्द्वयात्मकम् । कथितं ब्रह्मणो विष्णोरग्निना कथितं यथा ।।

पुराणमग्निना गीतमाग्नेयं ब्रह्मसम्मितम् । यः पठेत् श्रुणुयाद् व्यास लिखेद्वा लेखयेदपि ।।

श्रावयेत् पाठयेद्वापि पूजयेद् धारयेदपि । सर्वपापविनिर्मुक्तः प्राप्तकामो दिवं व्रजेत्।। '' इति ।

स्वतोऽग्निनोक्तम्-

''आग्नेयं ब्रह्मरूपं ते पुराणं कथितं मया । सप्रपञ्चं निष्प्रपञ्चं विद्याद्द्वयमयं महत् ।।

अनिष्ट्वा तु महायज्ञान् अकृत्वापि पितृस्वधां । किं तीर्थैर्गोप्रदानैर्वा किं यज्ञैः किमुपोषितैः ।।

इत्याद्यनेककर्मभिर्यत् पुण्यं तदाग्नेयपुराणपठनात् श्रवणादेव प्राप्नुवन्ति जनाः ।

आग्नेयं ये हि श्रुण्वन्ति अहन्यहनि मानवाः ।

कृष्णमभ्यर्चयन् भक्त्या नैनसो भाजनं भवेत् ।

सर्वकारणम् अत्यन्तं विष्णुं ध्यायन् न सीदति ।'' इत्यादि ।

।। इत्यग्निपुराणं समाप्तम् ।।